# ॥ हरि ॐ ॥

## ॥ महाप्रभुदत्तात्रेय स्तवनम्॥

दत्तात्रेयं सनातनं ब्रह्म निरञ्जम् । आदिदेवं निराकारं व्यक्तं गुणविवर्जितम् ॥१॥

चिन्मयं व्यापितं सर्व चिदाकाशं दिगम्बरम् । निर्विकल्पं निराभासं दृश्यदर्शनवर्जितम् ॥२॥

अगोचरं निरालम्बं ब्रह्मचारी यतीश्वरः । भर्गलोकनायकं सम्पूर्णं परमात्मनरक्षकः ॥३॥

आशापाशविबन्धनमुक्तःशौचाशौचविवर्जितयुक्तः । शून्यागारे समरसमज्ञः शुद्धविशुद्धं सततसमज्ञः ॥४॥

दत्तात्रेय नाथोत्तमं सुखदं परमानन्दसागरम् । चित्कीर्तिभूषणं वन्दे स्मर्तृगामी स माऽवतु ॥५॥

हर्षवर्धनं वन्दे कैवल्यसुखदायकं । सकलागमपूजितं वन्दे स्मर्तृगामी स माऽवतु ॥६॥

संसारतमनाशनं संकल्पदुःखदलनम् । तापत्रयनिवारकं वन्दे स्मर्तृगामी स माऽवतु ॥७॥

संशयार्णवखण्डनं दोषत्रयविभेदिनम् । ब्रह्मप्रकाशात्मानं वन्दे स्मर्तृगामी स माऽवतु ॥८॥

भार्गवप्रियकृत्तमं दूरत्वपरिनासनम् । जगदार्जवपालनं वन्दे स्मर्तृगामी स माऽवतु ॥९॥

नमस्ते कालाग्निशमनाय योगिजनवल्लभाय नमोऽस्तु ते । नमस्ते अत्रिपुत्राय दत्तात्रेयाय नमोऽस्तु ते ॥१०॥

नमस्ते लीलाविश्वम्भराय अवधूताय नमोऽस्तु ते । नमस्ते अनसूयानन्दनाय दिगम्बराय नमोऽस्तु ते ॥११॥

नमस्ते सत्वसाध्याय सत्वसाक्षिणे नमोऽस्तु ते । नमस्ते गुह्यतमाय चिद्विलासाय नमोऽस्तु ते ॥१२॥

नमस्ते क्षेत्राधाराय क्षेत्रशून्याय नमोऽस्तु ते । नमस्ते रुपकारणाय गगनाकृतये नमोऽस्तु ते ॥१३॥

श्रीदत्तात्रेय पाहि मां प्रसीद दिगम्बर । क्षमस्व अवधूत रक्ष रक्ष श्रीगुरो ॥१४॥